सं० ४९५४

नाम - लघुस्तवटीका मन्त्रराजार्थ दीपिका

कर्ता - हरिदासमिश्रः

पत्र संख्या - १२ पत्राणि सं० ——— ×

विषयः — भक्तिशास्त्रम्

© Dharmartha Trust J&K. Digitized by eGangotri

मंत्रराजार्थदीपिका
लघुस्तवटीका
४९५४

4954

F. = 12

© Dharmartha Trust J&K. Digitized by eGangotri

ॐ श्रीगणेशाय नमः श्रीमन्मदनगो
पालं नत्वा तत्वार्थदायकम् सर्ववि
द्याप्रदातारं दातारं सर्वसंपदां १ विष्णु
दासतनूजेन हरिदासेन धीमता वि
रच्यते यथाबुद्धि मंत्रराजार्थदीपिका
स्वसभायामुपविष्टेन केनचिद्राज्ञा हृ
दयेशं तत्रागताः सर्वशास्त्रज्ञाः पंडि
तः विद्याविशेषोत्कर्षेप्सुः शीर्षस्वहृ
त्कमलविन्यासमात्रेण सर्व
पानिरत्नरसापिशिषोर्गे गानरंगा
नुसारिणीं तन्नालिकाभिनवकाव्य
कर्तव्यतामाह ततस्तस्य योभूपभूते
पचालनेन राजपुरुषैरुपाहृतस्त्रष्ट
मवर्षदेशीयो बालकः संस्नाप्य वस्त्रा
लंकृतः पुरस्तादुपवेश्य मस्तके द
क्षिणहस्तं दत्वा वदेति विदुषा साद्ये प
भाषित अनेककर्मोत्तमां मंत्रगर्भामें
कस्यैवेत्येकविंशतिकाव्यमयीं नव
कोटिकात्यायनीस्तुतिं व्याजहार तत

© Dharmartha Trust J&K. Digitized by eGangotri

ल.टी. स्यचस्वतोमंदमतित्वात् श्रुत्कंपया
१ टीकांतरमवलोक्यमतिवर्यहरिदास
पंडिताःकुर्म्मः [illegible] एषासौबुद्धौ
प्रत्यक्षाप्रत्यक्षरूपात्रिपुरादेवीत्रिभिः
पदैर्विशेषणैः सहसाशीघ्रमेववोयु
ष्माकमघंपापंकिंध्यात्तविनाशयेत्
त्रीणिपुराणिनगराणियस्याःसास्व
र्गमर्त्यपातालेचेत्यर्थः कथंभूतादे
वीवाग्मयीवाग्रूपा पुनःकथंभूताज्यो
तिर्मयीतेजोमयीतेजःस्वरूपेत्यर्थः
पुनःकथंभूतादेवीमध्येललाटेलला
टस्यमध्येपंद्रस्येंद्रसंबंधिनःशरासन
यत्रघद्वशक्रकार्मुकस्येवप्रभांप्रो
भांदधतीविभ्रती यथेंद्रधनुःपीतसि
तासितरक्तहरित्येवंपंचवर्णंदधाति
तथासापिललाटे पुनःकथंभूतादे
वीशिरसिमस्तकेप्रत्नसुगौरिवशी
तलकिरणेवचंद्रस्येवसर्वतःसमंता
त्प्रोद्वीउज्वलांकांतिंदीप्तिमातन्व

© Dharmartha Trust J&K. Digitized by eGangotri

तीविस्तारयंती पुनःकथंभूतादेवीहृ
दिहृदयेसर्वदाग्रहःस्थिताशिवसेवन्ते
मानाउक्मांशोःघर्मरश्मःसूर्यस्यद्युति
रिवस्थिता १ यामात्रेति हेदेविभग
वतित्रिपुरेयामात्राओंकाररूपाप्रथमे
भववाग्बीजेऐंकारेस्थितातेनवतांमा
त्रांवयंसदामनमहेध्यायेम कथंभूः
तामात्रा त्रपुसीलतातंतुलसमंतात्स्य
तिस्पर्द्धिनी त्रपुसीलताकर्कटीवल्लिः
तस्याःतनवःसूक्ष्माःलसंतःप्रसरंतोये
तंतवेगुणाःसूत्राणितेषां उस्थितिः
प्रथमारंभःतांस्पर्द्धतेअनुकरोतिसा
त्रपुस्यानवोत्पन्नास्तंतवःकुटिलाका
राभवंतीत्यर्थः सापिमात्राकुंडलिनी
तिज्ञेया इयंशक्तिःकुंडलिनीइतिख्या
ताविघ्नजननव्यापारबद्धोद्यमा चत
ट्प्राभुवनसृष्टिसाधनाइत्यत्रात्वावि
ज्ञायनराःमनुष्याःपुनःजननीगर्भेमा
तृगर्भेअर्भकत्वंडिंभत्वंनस्पृशंतिना
नुभवंतेविश्वस्यजगतोजननेउत्पाद

© Dharmartha Trust J&K. Digitized by eGangotri

नैतस्यव्यापारःकर्मैवब्रह्मोद्यमाकृतप्र
याससाविश्वजननव्यापारब्रह्मोद्यमा ।
ऐंकाररूपावाग्बीजमयपरमाशक्ति
ध्यानात्प्राप्तज्ञानमहामेदो योगि
नो मोक्षपदमेवाप्नुवंति नचसंसारदुः
खभाजो भवंतीति श्लोकार्थः २ प्रज्ञा
नोद्धारितस्यापि एतस्य बीजस्य प्रभाव
निरूपयमाह इष्टेति हे वरदे ग्रथिमति
दायिनि देवितस्यापि वरूपस्य वक्त्राम्बु
जान्मुखकमलात्प्रभवमेवनिश्चयेने
व वाचः वाण्यः निर्यांति निःसरंति ।
कथंभूताः वाचः सूक्तिसुधारसद्रवमु
चः सुष्ठुउक्तिः सूक्तिरेव सुधारसद्रवः
अमृतरसनिर्यासः तं मुंचंतीति ताः सू
क्तिसुधारसद्रवमुचः कस्मिन्सति त
रसावेगेनतवात्तुयहेजातेउत्पन्नेसति ।
तस्यकस्यइहभूमौसंभ्रमकारिआश्चर्य
कारेवस्तुपदार्थेसहसाअकस्मात् दृ
ष्ट्वाविलोकयेनकेनचित्स्वरूपेणआ
कृतवशादपिकौतकवशादपिऐंएव

© Dharmartha Trust J&K. Digitized by eGangotri

तिबिंदुविनापिअनुस्वारवर्जितंअंतरं
व्याहृतंउच्चारितंयेनसच्चारिणामोक्षोभ
वत्येवइतिअनुबीजोच्चारणादपिक
वित्वप्राप्तिर्भवतीत्यर्थः ३ द्वितीयबी
जान्तरेसंगतंबीजांतरमाह यदिति ।
हेनित्येदेवियत्तत्वअपरंद्वितीयंमंत्रा
न्तरंकामराजंकामराजनामक्लींकाम
रूपंनिष्कलंसूर्यकांतिप्रभंतत्सारस्व
तमितित्रिभुविभूमौकश्चिद्द्विरलोबुधःप
ण्डितःअवैतिजानाति अस्यैवान्तरस्य
ज्ञापकमाह यत्मंत्रान्तरंप्रतिपर्वअ
मावास्यायांपौर्णमास्यांवासत्यनपसः
सत्यतयानाम्नाब्रह्मर्षेराख्यानेदृष्टांत
कीर्तयंतोव्याख्यायंतोद्विजाब्राह्मणाआरं
भेकथाकथनप्रारंभेप्रणवास्पदप्रणा।
यिनांनीत्वास्फुटयथास्यात्तथाउच्चरंति
उच्चारयंति प्रणव ॐकारः तस्यआस्प
दंस्थानंतत्रप्रणायिनाबीजनातां ३का
रत्रयंमंत्रपदंनीत्यर्थः निर्गतककारल
कारान्तरंनिष्कलमितिज्ञेयं अपगत

© Dharmartha Trust J&K. Digitized by eGangotri

रेफमित्यपरं ज्ञेयं क्लीमेतस्मिन्मंत्रे कका
रेलकारे गते इमिति अवशिष्टं ज्ञेयं हिम
वत उत्तरे पुण्यभद्रा नाम नदी तस्यास्ती
रे पुण्यभद्रो नाम वटः तत्र सत्यतपा ना
मा ऋषिस्तपश्चकार एतदक्षरोद्धार
णो च तस्य महर्षेर्हेतुमाह तस्याश्रमे
अन्ये मुनयस्तपः समाचरंतो निष्ठुरवा
णया तज्जर्जरीकृतकलेवरं चीत्कार
वधिरीकृतदिगंतरं सूकरमालोक्य
परमकारुण्यात्तत्पीडया तेषां मुखक
मलात् ईमित्यक्षरं विनिर्गतं अनंतरं
तत्कालमेवागतेन अधिज्यकार्मुकेन
व्याधेन पृष्टं हे मुने मदीयप्रहारहतो वरा
हः केन मार्गेणागतः पीड्यते मे बुभुक्षया
कुटुंबं तत्कथय पश्चात्तद्दृष्टमिति क
थने असत्यभाषणं सत्यकथने परपीड
तदिदमुभयविरुद्धमापतितं इति चिंतया
व्याकुलितस्य परलोकभीरोर्मुनेः ईकार
रूपसारस्वतबीजोच्चारमात्रे संतुष्टा सर
स्वती मुखेऽवतीर्य सत्यं हितवचनमुक्त

© Dharmartha Trust J&K. Digitized by eGangotri

चारतयथा यापश्यतिनमानूतेयान्तू
तेमानपश्यति अहोव्यायस्वकार्या।
र्थिंन्किंछकस्मिसुद्धर्मुक्तः एतस्मेप्रद
यान्विशम्रणापिईकारमुच्चरंति ध।
यदिति अहंमनसाचेतसानात्मीयत्
तीर्थंइंद्रप्रभंचेंद्रसरघांचेंद्रवद्भुज्वलं
तहीजंसर्वेनिर्दिष्टंहसोऽत्रपंअहंनमा
मि नत्किंबुधैःपंडितैःयद्दीजंवचसो
वाचांप्रवृत्तकरणेवचनपादवेसयस्म
त्लणेदृष्टप्रभावे दृष्टप्रभावोयस्यतत्
अहंवीपिवउवानलोपिस्मरस्वंनीनामन
दीअत्रुगतोमिलितः जाड्यांबुविच्छि
न्नयेजाड्यभवसंशोषणायअस्तुस्या
त् गोरितिपतस्यस्यापकमाह गोः
शाह्नःगिरिवाणोवर्न्नेतेमगोशाह्नःनि
यतेनिश्चितेयोगयोगाभ्यासंविना
पिसिद्धिदःसिद्धिदाता पूर्वोहं अ
हमितिनविद्यतेहकारोयत्रतत् अ
हंअहंकाररहितेसोःइतिपदंसार
दवीजंतेयं उक्ताहं अस्मैवीइत्य

© Dharmartha Trust J&K. Digitized by eGangotri

ल॰टी॰ त्र्यक्षरत्वे औरि ति पदत्रयं कर्त्तव्यं न विद्य
५ ते सकारो यत्र तत् असत् सकारवर्जितमि
त्यर्थः त्वं पुनः एतेन च औरि ति केवल
मिद्दं ५ पदार्थं सर्वाम्नायसंग्रहमाद्द
एकैकमिति हृदे विभगवति त्वमेकै
कमेकमेकं बीजं मंत्रात्तरं यं यं कामम
भिमतपदार्थं अपेत्य आश्रित्य येन के
न चापि विधिना चिंतितं स्मृतं वा अथ
वा जप्यं पौनःपुन्येन चिंतितं सत् तूर्णं
ध्यातृपुरुषाणां तेते समस्तं मनोरथं
तरसा वेगेन सफलीकरोति पूरयती
त्यर्थः कथंभूतं बीजं अनघं निर्दूषणं
पुनः कथंभूतं बीजं सव्यंजनाव्यंजनं ।
व्यंजनेन वर्णेन अर्द्धमात्रेण वर्णेन स
ह वर्तते तत्सव्यंजनं न विद्यते व्यंजनं
यत्र तत् अव्यंजनं केवलस्वरमयं स
व्यंजनं च अव्यंजनं च अनयोः समाहा
रः सव्यंजनाव्यंजनं तत्र सव्यंजनं मू
लाम्नायरूपं अव्यंजनं च परं ओं इति ज्ञे
यं पुनः कथंभूतं बीजं कूटस्थं अने।

© Dharmartha Trust J&K. Digitized by eGangotri

कालरसंयोगवीजं ह्सौं क्लीमित्यादि य
दिवा श्रथकपकैकंवीजं पुनः कथंभूतं
वीजं क्रमगतं क्रमेण परिपाट्या लोकप्र
सिद्धया शिवशक्तिसंयोगरूपया स्थितं
यथा स्हौः स्क्लीं इत्यादि पुनः कथंभूतं या।
हाव्युत्क्रमात् विपरीतं स्थितं शक्त्याक्रां
तं शिववीजमित्यर्थः यथा म्हौमित्यादि ६
वामे पुस्तकेति ग्रथप्रस्तुतमारस्वत
सिद्धार्थं ध्येयविभागमाह हे अंब हे मा
तः ये पुरुषाः पुनाहं शीत्वां मनसा न पश्य।
लयंति न ध्यायंति तेषां कवित्वं काव्यकर्तृ
त्वं पुनः न कुतोपीत्यर्थः कथंभूतां त्वां वा
मे हस्ते पुस्तकधारिणीं द्वितीयेवामेत्र
भयदां अभयप्रदात्रीं पुनः कथंभूतां द
क्षिणे हस्ते मालस्रजं ग्रतेणाजपमा
लया सह वर्त्तमाना स्तकमालायस्याः
सा तां पुनः कथंभूतां भक्तेभ्यः सेवकेभ्यो
वरदानपेशलकरां वरदानेन पेशलं
कवित्वकरणपाटवं करोतीति सा तां ।
यद्वा वरदानपेशलः वरदानसमर्थः द्वि
तीयदक्षिणकरो यस्याः सा तां चतुर्भु

© Dharmartha Trust J&K. Digitized by eGangotri

जाभिप्रायेणोक्तमिति पुनः कथंभूतां
कर्पूरकुंदोज्वलां कर्पूरवत् कुंदपुष्प
वच्च उज्वला गौरा सा तां पुनः कथंभूतां
तां उज्जृंभांबुजपत्रकांतनयनस्निग्ध
प्रभालोकिनीं उज्जृंभितं विकसितं पा
दांबुजं पद्मं तस्य पत्रे पर्णे तद्वत् कांते म
नोहरे ये नयने नेत्रे तयोः स्निग्धा विशेषदी
प्ता या प्रभा दीप्तिः तया आलोकितुं शी
लं यस्याः सा तां ७ निरंकुशावतनकवि
त्वशक्तये विशेषोपदेशमाह ये त्वामि
ति हे भारति सरस्वति ये पुरुषाः मूर्ध्नि स्थि
तां मस्तकोपरि स्थितं ध्रुवमिव स्थितां त्वां
ध्यायंति तेषां वक्त्रांबुजात् मुखकम
लात् अश्रांतं निरंतरं भारती वाणी नि
र्याति निर्गच्छति निःसरति कथंभूतां त्वां
पांडुरपुंडरीकपटलस्पष्टाभिरामप्रभां पां
डुरं श्वेतं यत् पुंडरीकं कमलं च तस्य प
टलं समूहः तद्वत् स्पष्टा प्रकटा अभिरा
मा सुंदरा प्रभा यस्याः सा तां पुनः कथं
भूतां त्वां सुधांशोरिव अमृतद्रवैः शिरो
मस्तकं सिंचंतीं कथंभूता भारती वि

© Dharmartha Trust J&K. Digitized by eGangotri

कटस्फुटालवालपदा विकटानि उद्घाटानि
स्फुटानि प्रकटार्थानि प्रसन्नतराणि येषु एवं
भूतानि पदानि वाक्यानि यस्याः सा कथा।
मित्यर्थः तथाह स्वरसरितम्भागीरथ्यास्तस्याः
कल्लोलाः लहर्यः तद्वत् लोलाश्चञ्चला
स्ताः ऊर्मयः सावर्तपयःप्रवाहरूपास्ताभिः ८
परमपुरुषार्थं मुक्तिं कामपुरुषार्थं सि
द्धये ध्यानविशेषमाह ये सिंदूरेति हे दे
वि तेषां पुंसां ध्रुवं निश्चयेन त्रस्तकुरंगशा
वकदृशः स्त्रियः वशगाः भवन्ति रागपरवशा
जायन्ते कुरंगाणां मृगाणां शावकाः बा
लकास्तेषामिव दृशौ दृष्टी यासां ताः कथं
भूताः स्त्रियः अनंगज्वरक्रान्ताः कामपी
डान्विताः तेषां केषां ये पुरुषाः त्वाम
पि अनन्यमनसः एकाग्रचित्ताः सन्तः त्व
तेजसा तव देहदीप्त्या स्वर्णसिंदूरपरा
गपुंजपिहितां सिंदूररेणुपटलव्याप्तां
पश्यन्ति आकाशं सिंदूररेणुपटलव्या
प्तं ध्यानभंग्या प्रत्यक्षमिव विलोकयन्ती
त्यर्थः पुनस्ते के ये रमां उद्दीप्ती मणिच
विलीनयाचकरसमयास्तारमग्नामिव त्वद

© Dharmartha Trust J&K. Digitized by eGangotri

ल.टी.
६

लक्ष्मविंदुदेवतरिनामिवपश्यंतिध्यायंति २
ग्रथमास्वनाजगतोंतःपुरुषार्थसाराम
र्थसिद्धिमाह चंचदिति श्रियो लक्ष्म्याः ले
शोपसंगृह्य चिरंचिरकालं स्थैर्यां स्थिर
तां भजंते प्राप्नुवंति तेषां केषां हे भगवति
ये पुमांसः तामपि निमेषमात्रमपि त
कृते चेतसि तन्मेत्र स्थिते मनसि स्थिरां कृ
त्वा त्वां देवीं ध्यायंति चिंतयंति कथंभूतां
त्वां चंचत्कांचनकुंडलांगदधरां चंचती
देदीप्यमाने कांचननिर्मिते कुंडलांगदे
कर्णाभरणहस्ताभरणे धरतीति सा तां
पुनः कथंभूतां त्वां आबद्धकांचीस्रजं नि
बद्धमेखलामित्यर्थः कथंभूताः श्रियः
विभ्रमानतोनल्पकाल्प्रहरहः दिने दिने
स्फारीभवंत्यः विस्तारं प्राप्नुवंत्यः उत्तरोत्त
रं वर्द्धमाना इत्यर्थः पुनः कथंभूताः श्रि
यः माद्यत्कुंजरकर्णताललतरलाः मा
द्यंतो मदोन्मत्ता ये कुंजरा गजास्तेषां क
४ र्णास्तद्वत् चंचलाश्चाभ्यारति तद्रू
पं संपत्त्रये सर्वसिद्धिमयतद्रूपप्राप्त
ये योगिनः तां भगवतीं ध्यायंति ध्यानं

© Dharmartha Trust J&K. Digitized by eGangotri

ऊर्वंतीत्यर्थः योगिनः इति शेषः आर्भ
ट्या आभरणेन उपलक्षितामित्यर्थः पु
नः कथंभूतां त्वां शशिखंडमंडितजटा
जूटां चंद्रकलालंकृतमौलिं पुनःक
थंभूतां त्वां नृमुंडस्रजं मनुष्यमुंडमाला
धरां पुनःकथंभूतां त्वां बंधूकप्रसवा
रुणांबरधरां बंधूकपुष्पं जपापुष्पं त
द्वत् अरुणं आरक्तं अंबरं वस्त्रं तद्धरती
सा तां पुनःकथंभूतां त्वां प्रेतासनध्या
सिनीं प्रेतासने प्रेतवाहने आध्यासिनी
उपविष्टा तां पुनःकथंभूतां त्वां चतुर्भु
जां चत्वारो भुजा बाहवो यस्याः सा तां
पुनःकथंभूतां त्वां त्रिनयनां त्रीणि न
यनानि लोचनानि यस्याः सा तां पुनः
कथंभूतां त्वां आपीनतुंगस्तनीं आस
मंतात् पीनौ पृथुलौ तुंगौ उत्तुंगौ स्तनौ
कुचौ यस्याः सा तां पुनःकथंभूतां त्वां
मध्ये नाभेरधोभागे निम्नवलित्रयांकि
ततनुं निम्नं यत् वलित्रयं तेन अंकिता
चिह्निता तनुर्यस्याः सा तां ॥ अस्मे
वार्थं दृष्टांतेन दृढयन्नाह जातोपीति ॥

© Dharmartha Trust J&K. Digitized by eGangotri

ल.टी. ७

हे देवि क्षितिभुजां राज्ञां अल्पपरिच्छेद
स्तोकपरिवारे सामान्यमात्रे अपकृष्ट
कुले जातोऽपि उत्पन्नोऽपि वत्सराजो ना
म सामान्यराजा यतस्तस्मात् हेतोः निः
शेषावनिचक्रवर्त्तिपदवीं बुध्वा अखं
डलमहीमंडलसार्वभौमतां प्राप्य प्र
तापोन्नतः शत्रुच्छेदकृतकीर्त्तिश्रेष्ठः
तथाविद्याधरवृंदवंदितपदः खेचरच
क्रचर्चितचरणः अभवत् बभूव सोऽयं
प्रसादोदयः त्वच्चरणांबुजप्रणतिजो
वर्त्तते इति शेषः तव चरणांबुजे पादक
मले यो प्रणतिर्नमस्कारः तस्माज्जा
त इति त्वच्चरणांबुजप्रणतिजः वत्सरा
जो नाम राजा अनेकराजमुकुटकोटि
तटघृष्टपादो जातः स निश्चितं सर्वका
र्य्योत्कर्षमूलत्वद्रूपानुध्यानसंभवः १२
देव्याः पूजामाहात्म्यमाह चंडीति ने
पुमांसः पृथिवीभुजो नरेंद्राः कथमिव
जायते कथमपीत्यर्थः कथंभूताः पृ
थिवीभुजः पताटप्रोपाणिभिः कृतैः उ
पलक्षिताः कथंभूतैः पाणिभिः दंडांकु

© Dharmartha Trust J&K. Digitized by eGangotri

शचक्रचापकुलिशश्रीवत्समत्स्यां।
कितैः दंडः ध्वजदंडश्छत्रं अंकुशश्च चक्रं
चापो धनुश्च कुलिशं वज्रं च श्रीवत्स
श्च मत्स्यश्च तैरंकिताः चिह्निताः स्तैः ।
पुनः कथंभूतैः पाणिभिः अंभोजप्रभैः
कमलदीप्तिभिः ते के हे देवि हे चंडि तव च
रणांबुजार्चनेन कृते तव पादकमलपू
जार्थं येषां पुरुषाणां कराः पाणयः वि
ल्वीदललोलुंठनात्त्रुट्यत्कंटककोटिभिः
विल्वीपत्रत्रोटनलग्नकंटकाग्रैः परि
चयं संपर्कं नजग्मुर्न गताः विल्वीद
लानां विल्वपत्राणां उल्लुंठनात्त्रोटनं
तस्मात्त्रुट्यंति यानि कंटकानि तेषां को
टयोऽग्राणि तैः ॥ एवं पूजाफलमु
क्त्वा होमफलमाह विप्रा इति हे त्रिपु
रे देवि विप्राः ब्राह्मणाः क्षोणिभुजो भू
भोक्तारः क्षत्रियाः विशः वैश्याः तदित
रे शूद्राः स्त्री राज्यमध्वेतरैः दुग्धघृता।
मातिकेक्षुरसैः पूजाविधौ पूजावसरे
परापरकलां पराचीनार्वाचीनावस्था

© Dharmartha Trust J&K. Digitized by eGangotri

ल॰टी॰
८

मर्थीत्वां भगवतीं संतर्प्य प्रीणयित्वा
ये वर्तंते तेषां स्थिरधियां स्थिरबुद्धीनां
नां पुरुषाणां मनःस्वांते ये ये सिद्धिप्रा
र्थ्यंते ते तां तां सिद्धिं मनसीप्सितां सि
द्धिं ते पुरुषाः एवं निश्चयेन प्राप्नुवंति
कथंभूतास्ते तरसा बलेन विघ्नैः उपद्र
वैः अविघ्नीकृताः अबाधिताः १४ भ
गवत्या एव सर्वावस्थायां देवतामयत्वमा
ह शक्रानामिति हे देवि त्रिभुवनेश
क्रानां ब्रह्मयोगिकादीनां त्वं जननी
उत्पादयित्री अतो हेतोः त्वं वाग्वादि
नीत्युच्यसे लोकैरिति निश्चयः वाचो वा
णीर्वदन्तीत्येवंशीला वाग्वादिनी स
र्वशास्त्राणां त्वत्त आविर्भूतानीत्यर्थः
केशववासवप्रभृतयोपि विष्णुशक्रा
दयोपि देवाः त्वत्त एव आविर्भवंति उत्प
द्यंते इदं स्फुटं प्रकटं वर्त्तते इत्यर्थः अ
नेन देवानामपि जननी त्वमुक्ता खलु
निश्चयेन कल्पविरमे कल्पांते ते प्र
सिद्धाः अमी ब्रह्मादयोपि यंत्रयस्यांत

8

© Dharmartha Trust J&K. Digitized by eGangotri

धिलीयंतेत्वीनामभवेति सात्वंकाचि
तग्रनिर्वचनीयापराउत्कृष्टाशक्तिः
गीयसेमुनिभिरितिशेषः कथंभूता
त्वंअचिंत्यरूपमहिमाअलत्तस्वरू
पमाहात्म्या ॥५ देवानामिति हे
भगवतितेतवत्रिपुरेतिनामतत्वतः
इतिविचारतः अन्वेतिअन्वयपूर्वकंभ
गवतिसार्थकंभवति इतिकिंदेवा
नांत्रितयीब्रह्मविष्णुमहेश्वराणां
त्रितयीत्वमेवकृतभुजांअग्नीनांदक्षि
णाग्निगार्हपत्याहवनीयाख्यानांत्र
यीत्रितित्वमेवशक्तित्रयंत्वमेव प्रभु
शक्तिःउत्साहशक्तिःमंत्रशक्तिश्च
त्रिस्वराःत्वमेवत्रयःस्वराःअकारइ
कारउकाररूपाःइत्यर्थः त्रैलोक्यं
त्वमेव स्वर्गमर्त्यपातालरूपंयद्वा
मूलाधारस्वाधिष्ठानमणिपूरकमि
त्येकोलोकःआहारनिरोधविरुद्धइ
तिद्वितीयोलोकः आज्ञास्पर्शब्रह्म
स्थानमितितृतीयोलोकः इतिवात्रै

© Dharmartha Trust J&K. Digitized by eGangotri

लोकं त्रयत्रिपदी त्वमेव गगनाने
दः पद्मानंदः कमलानंद इति नाट
त्रयं त्रिपदी यद्वा त्रिपदी गायत्री
रूपा त्वमेव शिवो हृदयकाभिकम
लरूपं त्वमेव तीर्थत्रयं वा त्रिपुष्क
रं त्रिब्रह्म त्वमेव इडापिंगलासुषु
म्नाख्या त्रिब्रह्मेत्युच्यते त्रयो वर्णाः
ब्राह्मणादयस्त्वमेव एवं यत्किंचि
त्त्रिवर्गादिकं वस्तु पदार्थः जगति
भूमौ त्रिधा त्रिप्रकारं तथा नियमितं
नियमेन कृतं तत्सर्वं त्वमेव त्रिवर्गो
धर्मकामार्थौरित्यमरः त्रयात्मका
ये भावास्ते सर्वेपि त्रिपुरानामांतर्ग
ता इति भावः १९ लक्ष्मीमिति हे भ
गवति जनाः अमीषु स्थानेषु त्वां स्मृ
त्वा विपदस्तरंतीत्यन्वयः तान्येव
स्थानान्याह राजकुले भूपतिद्वार
प्रदेशे लक्ष्मीं श्रियं नवयौवनास्वकी
भरणभूषितां ईदृशीं त्वां स्मृत्वा नराः
वंधवयारातिमहाविषव्याधिभ्यो मु

© Dharmartha Trust J&K. Digitized by eGangotri

चांतरस्त्यर्थः एवं रणेषु विसंग्रामेषु
विजयाजयानाम्नी देवी स्मृता अथव
निमार्गे क्षेमंकरी स्मृता कष्टभूतेष
ष्वनि क्रव्याद द्विपसर्पभाजि क्रव्या
दाः राक्षसाश्च द्विपाः गजाश्च सर्पाः
कृष्णाहयश्च तान् भजतीति स तस्मि
न् कांतारदुर्गे कांतारे विषममार्गे
दुर्गे रौद्रस्थाने गिरौ पर्वते शावरीना
म्नी देवी स्मृता भूतप्रेतपिशाचजंभ
कभये प्राप्ते सति महाभैरवी स्मृता ।
भूताश्च प्रेताश्च पिशाचाश्च जंभकाश्च
तेभ्यो भयं तस्मिन् व्यामोहे चित्तभ्रमे
सति त्रिपुरा स्मृता तोयप्लवे जलक्षो
उनेतारा स्मृता तस्मात्संकटात्तिर्
स्तारंतीतिभावः ७ मायेति एतानि
देव्याश्चतुर्विंशतिनामानि माया
कुंडलिनी क्रिया मधुमती काली ।
कलामालिनी मातंगी विजया जया
भगवती देवी शिवा शांभवी शक्तिः
शंकरवल्लभा त्रिनयना वाग्वादिनी ।

© Dharmartha Trust J&K. Digitized by eGangotri

ल॰टी॰
१०

भैरवी ह्रींकारी त्रिपुरा परा परमयी
माता कुमारी इति चतुर्विंशतिनाम्नी
नमस्निवर्णसोविशेषनामार्थस्तुटीका
तरादवगंतव्यः ८ आईपल्लवितैरि
ति हे त्रिपुरे हे भैरवपत्नि रुद्रपत्नि रु
द्राणि तैः अतैः खलु निश्चयेन तेतव
यानि अत्यंत त्रयाणि नामानि भवंति
तेभ्यः नामेभ्यः नमः नमस्कारो अस्तुक
थंभूतेभ्यः तेभ्यः अपिकेभ्यः कथंभूतैः
अतैः आईपल्लवितैः आकार ईकार
संयुक्तानामाग्रैः पुनः कथंभूतैः आ
तैः परस्परयुतैः अन्योन्यमिलितैः
पुनः कथंभूतैः अतैः द्वित्रिक्रमाद्या
तैः वर्णाह्वयत्रयचतुष्टयवद्भिः पु
नः कथंभूतैः अतैः कादैः कादिवर्णा
द्यैः पुनः कथंभूतैः स्वरादिभिः स्वराअ
कारादयआदैयेषांतैः पुनः कथंभू
तैः अतैः दांतैः पुनः कथंभूतैः सस्वरैः
स्वरसहितैः एवमेवदृष्टोरतैः प्रत्येकं
गण्यमानानियानिनामानि भवंतितेभ्यो

© Dharmartha Trust J&K. Digitized by eGangotri

नमः इत्यर्थः यथा अकारई अवोई इत्या
दि पदान्वयांतरमुच्यते हे त्रिपुरे हे
भैरवपंक्तिआई पल्लवितैः आकारईका
रसंयुक्तनामाद्यैः परस्परयुतैरन्योन्य
मिलितैः द्वित्रिक्रमादानतैः वर्णद्वय
त्रयचतुष्टयवद्भिर्नामभिः काद्यैः लांत
गतैः स्वरादिभिकवर्णमादौकृत्वा लर
पकारपर्य्यंतैः पंचत्रिंशद्वर्णैः षोडशभिः
स्वरैः सहप्रत्येकं गणएनामानियानि
नामानिभवंतिषष्ठ्याधिकानिपंचशता
नितेभ्यो नमः अथानंतरं तानेवतैः क
काराद्यैः लकारपर्य्यंतैः आई पल्लवि
तैः परस्परयुतैः यानिनामानिभवंति
तेभ्यो नामभ्यो नमः कथंभूतैः सस्व
रैः षोडशस्वरसहितैः यथा अकका
ईइत्यादिमिलने षष्ठोत्तरशताधिका
नि विंशतिसहस्राणि नामानि जायंते
तेभ्यः नामभ्यः नमः इत्यर्थः ९९ बोद्ध
व्येति बुधैः व्याख्याप्रवीणैः पंडितैः
निपुणं यथास्यात्तथा मनश्चिंतंतकृतं

© Dharmartha Trust J&K. Digitized by eGangotri

ल॰टी॰
११

भगवतीगतेकृत्वा विधायइयं स्तुतिः
बोद्धव्या कस्याः स्तुतिरित्याह त्रिपु
रेति भारत्याः त्रिपुरापराख्यायाः स
रस्वत्याः कथंभूतायाभारत्याः अन
न्यमनसः असामान्यचेतसिकाया
महामायायाः इत्यर्थः यत्र यस्यां स्तु
तौ स्फुटं प्रकटं आद्यवृत्ते प्रथमश्लोके
एकद्वित्रिक्रमेण त्रिभिः पदैः तस्मात्सं
ख्यातैः वाग्बीज कामबीज शक्तिबी
जरूपेण मंत्रोद्धारविधिः कथितः क
थंभूतः मंत्रोद्धारविधिः विशेषसहितः
विशेषेण सहितो युक्तः पुनः कथंभूतः
मंत्रोद्धारविधिः सत्संप्रदायान्वितः ।
सन् समीचीनः संप्रदायः गुरुपारंपर्य्यं
स्तेन अन्वितः संयुक्तः २० सावद्य
मिति इदं स्तोत्रं सावद्यं सदोषमस्तु
यदि वा यद्वा निरवद्यं निर्दोषमस्तु
अथवा अनया चिंतया किं कोऽत्र पर
मार्थः नूनं निश्चितं यस्य जनस्य त्व
यि विषये भक्तिरस्ति वर्ण्यते जनः इदं ।

© Dharmartha Trust J&K. Digitized by eGangotri

स्तोत्रं त्रिपुरास्तोत्रं पठिष्यति ननु
पाठकाभावे वैमनस्यं चेत् किमर्थं स्तु
तिः कृतेत्याह इदं स्वसार्थं आत्मनि
लघुत्वं बालकत्वं संचिंत्यापि यस्मा
त्कारणान्मयापि हे मातस्तव लेशवं नि
श्रयेन रचितं कृतं कथंभूतेन मया
त्वद्भक्त्या मुखरीकृतेन भक्तिरसवला
द्वाचालेन कथंभूते लघुत्वे संजाय
माने उपहास्यमाने न केवलं भगव
तीस्तुतिकरणे मम शक्तिः समुल्ला
सः किंत्वद्भुतपरमानंदरसपरव
शेन मया देवीस्तुतेत्यर्थः २१ इति
श्रीमिश्रहरिदासविरचिता मंत्रराजरा
जार्थदीपका समाप्ता ॥ श्रीरस्तु
शुभम्

कालीतारामहाविद्याषोडशी भुवनेश्वरी ॥ भैरवी
छिन्नमस्ता च विद्या धूमावती तथा १ बगलामुखी
सिद्धविद्या मातंगी कमलात्मिका ॥ एता दश महा
विद्यास्तंत्रे सारप्रकीर्तिताः २

© Dharmartha Trust J&K. Digitized by eGangotri

मंत्र राजार्थदीधिका
ले घहलविच्या रखो खम्

© Dharmartha Trust J&K. Digitized by eGangotri